শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী হযগ্রীৱপঞ্জরম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী হযগ্রীৱপঞ্জরম্ ॥

অথ কল্পং প্রৱক্ষ্যামি হযগ্রীৱস্য পঞ্জরম্।
যস্য ৱিজ্ঞানমাত্রেণ ৱাণী গঙ্গেৱ নিস্সরেৎ॥ **1** ॥

শুদ্ধস্ফটিকসঙ্কাশং তুষারাচলসন্নিভম্।
শ্ৱেতপর্ৱতসঙ্কাশ চন্দ্রমণ্ডল মধ্যগম্॥ **2** ॥

চতুর্ভুজমুদারাঙ্গং পুণ্ডরীকাযতেক্ষণম্।
শঙ্খচক্রধরং দেৱং কিরীটমকুটোজ্জ্ৱলম্॥ **3** ॥

কৌস্তুভোদ্ভাসিতোরস্কং ৱনমালাৱিরাজিতম্।
পীতাম্বরধরং দেৱং শ্রীৱৎসাঙ্কিতৱক্ষসম্॥ **4** ॥

মুখ্যহস্তদ্ৱযেনৈৱ জ্ঞানমুদ্রাক্ষপুস্তকম্।
ধারযন্তং হযগ্রীৱং ধ্যাযেদিষ্টার্থসিদ্ধযে॥ **5** ॥

ওংকারোদ্গীথরূপায ঋগ্যজুস্সামমূর্তযে।
নমোঽস্তু দেৱদেৱায ৱাঞ্ছিতার্থপ্রদাযিনে॥ **6** ॥

অজ্ঞানতিমিরং ছিন্ধি জ্ঞানং চাশু প্রযচ্ছ মে।
দেহি মে দেৱদেৱেশ হযশীর্ষ নমোঽস্তু তে॥ **7** ॥

ভূতপ্রেতপিশাচাদীন্ ছিন্ধি দেৱ জনার্দন।
জ্ৱরাদীন্ নিখিলান্ রোগান্ নাশযাঽঽশু রমাপতে॥ **8** ॥

দারিদ্র্যং সকলং ছিন্ধি কুরু সৌভাগ্যভাজনম্।
শত্রূন্নাশয মে দেৱ হযশীর্ষ নমোঽস্তু তে॥ **9** ॥

মেধাং প্রজ্ঞাং বলং ৱিদ্যাং সংপদং পুত্রপৌত্রকম্।
দেহি মে দেৱদেৱেশ হযশীর্ষ নমোঽস্তু তে॥ **10** ॥

কার্কোটকমুখান্ সর্পান্ ৱিষাদীন্ ৱিলযং নয।
অমৃতং কুরু মে দেৱ হযশীর্ষ নমোঽস্তুতে॥ **11** ॥

স্ত্রীৱশ্যং জনৱশ্যং চ রাজৱশ্যং পরাৎপরম্।
কুরু দেৱাঙ্গনাবৃন্দসেৱ্যমানপদাম্বুজ॥ **12** ॥

হংসায পরমেশায চন্দ্রমণ্ডলৱাসিনে।
নমো হযোত্তমাঙ্গায ৱাঞ্ছিতার্থপ্রদাযিনে॥ **13** ॥

ঋগ্যজুস্সামরূপায ঋতায মহতে নমঃ।
ঋক্ষেশবিন্দুমধ্যস্থরাজীৱাসনভাজিনে॥ **14** ॥

ৱেদৱেদান্তৱেদ্যায ৱেদাহরণকর্মণে।
সত্ত্বাসত্ত্বমহামোহভেদিনে ব্রহ্মণে নমঃ॥ **15** ॥

প্রজ্ঞানদাযিনে নিত্যং ভজতাং ভাৱিতাত্মনাম্।
প্রণৱোদ্গীথৱপুষে প্রণতিং প্রতিপাদযে॥ **16** ॥

মন্দারকুন্দস্ফটিকমহনীযোরুৱর্চসে।
মনীষাপ্রদদেৱায মহাশ্ৱশিরসে নমঃ॥ **17** ॥

ইতি দ্ৱাদশমন্ত্রেণ নমস্কুর্যাজ্জনার্দনম্।
প্রাতঃ প্রসন্নৱদনং পূর্ৱাচার্যাভিৱন্দিতম্॥ **18** ॥

॥ শ্রী হযগ্রীৱপঞ্জরং সমাপ্তম্ ॥